# Sahasradhala Padma Aradhanam 3

Sri Kamakshi Srividya Samiti,  KKSF USA

# सहस्र-दल-पद्म-आराधना 3


| | |
|---|---|
| गणेश-पञ्च-रत्नम् | 3 |
| सुब्रह्मण्य-करावलम्बम् | 4 |
| आदित्य-कवचम् | 6 |
| श्री-गुरु-पादुका-स्तोत्रम् | 8 |
| काञ्ची-मठेश-करावलम्बम् | 9 |
| द्वादश-ज्योतिर्लिङ्ग-स्तोत्रम् | 11 |
| कामाक्षी-स्तोत्रम् | 12 |
| लक्ष्मी-नृसिंह-पञ्च-रत्नम् | 13 |
| श्री-राम-भुजङ्ग-प्रयात-स्तोत्रम् | 15 |
| विष्णु-षट्-पदी-स्तोत्रम् | 17 |
| मुकुन्दमाला (चितानि पद्यानि) | 18 |
| हनुमत्-स्तोत्रम् | 18 |
| मङ्गलम् | 19 |

# गणेश-पञ्च-रत्नम्

वक्रतुण्ड महाकाय सूर्यकोटि समप्रभ ।
निर्विघ्नम् कुरु मे देव सर्वकार्येषु सर्वदा ॥

मुदा करात्त-मोदकं सदा विमुक्ति-साधकं
कला-धरावतंसकं विलासि-लोक-रक्षकम् ।
अनायकैक-नायकं विनाशितेभ-दैत्यकं
नताशुभाशु-नाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतराति-भीकरं नवोदितार्क-भास्वरं
नमत्-सुरारि-निर्जरं नताधिकापद्-उद्धरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्त-लोक-शङ्करं निरस्त-दैत्य-कुञ्जरं
दरेतरोदरं वरं वरेभ-वक्त्रम्-अक्षरम् ।
कृपा-करं क्षमा-करं मुदा-करं यशस्-करं
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्ति-मार्जनं चिरन्तनोक्ति-भाजनं
पुरारि-पूर्व-नन्दनं सुरारि-गर्व-चर्वणम् ।

प्रपञ्च-नाश-भीषणं धनञ्जयादि-भूषणं
कपोल-दान-वारणं भजे पुराण-वारणम् ॥ ४ ॥

नितान्तकान्त-दन्त-कान्तिम्-अन्तकान्तकात्मजं
अचिन्त्य-रूपम्-अन्त-हीनम्-अन्तराय-कृन्तनम् ।
हृदन्तरे निरन्तरं वसन्तम्-एव योगिनां
तम्-एक-दन्तम्-एव तं विचिन्तयामि सन्ततम् ॥ ५ ॥

महा-गणेश-पञ्च-रत्नम्-आदरेण योन्वहं
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगताम् अदोषतां सुसाहितीं सुपुत्रतां
समाहितायुर्-अष्ट-भूतिम्-अभ्युपैति सोचिरात् ॥ ६ ॥

इति श्रीमच्छङ्कराचार्य-कृत-श्री-गणेश-पञ्चरत्नम् ।

## सुब्रह्मण्य-करावलम्बम्

हे स्वामिनाथ! करुणाकर दीन-बन्धो
श्री-पार्वतीश-मुख-पङ्कज-पद्म-बन्धो ।
श्रीशादि-देव-गण-पूजित-पाद-पद्म
वल्ली-सनाथ मम देहि करावलम्बम् ॥ १॥

देवाधि-देव-नुत देव-गणाधि-नाथ
देवेन्द्र-वन्द्य-मृदु-पङ्कज-मञ्जु-पाद ।

देवर्षि-नारद-मुनीन्द्र-सुगीत-कीर्ते
वल्ली-सनाथ मम देहि करावलम्बम् ‖ २‖

नित्यान्न-दान-निरताखिल-रोग-हारिन्
भाग्य-प्रदान-परिपूरित-भक्त-काम ।
श्रुत्यागम-प्रणव-वाच्य-निज-स्वरूप
वल्ली-सनाथ मम देहि करावलम्बम् ‖ ३‖

क्रौञ्चासुरेन्द्र-परिखण्डन शक्ति-शूल-
चापादि-शस्त्र-परिमण्डित-दिव्य-पाणे ।
श्रीकुण्डलीश-धृततुण्ड शिखीन्द्र-वाह
वल्ली-सनाथ मम देहि करावलम्बम् ‖ ४‖

देवाधि-देव-रथ-मण्डल-मध्यमेत्य
देवेन्द्र-पीडनकरं दृढ-चाप-हस्तम् ।
शूरं निहत्य सुर-कोटिभिरीड्यमान
वल्ली-सनाथ मम देहि करावलम्बम् ‖ ५‖

हीरादि-रत्न-मणि-युक्त-किरीट-हार
केयूर-कुण्डल-लसत्-कवचाभिरामम् ।
हे वीर तारक-जयामर-वृन्द-वन्द्य
वल्ली-सनाथ मम देहि करावलम्बम् ‖ ६‖

पञ्चाक्षरादिम्-अनु-मन्त्रित-गाङ्ग-तोयैः

पञ्चामृतैः प्रमुदितेन्द्र-मुखैर्मुनीन्द्रैः ।
पट्टाभिषिक्त-हरि-युक्त-वरासन-स्थ
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ७॥

श्री-कार्तिकेय करुणामृत-पूर्ण-दृष्ट्या
कामादि-रोग-कलुषीकृत-दुष्ट-चित्तम् ।
सिक्त्वा तु मामव कलाधर-कान्ति-कान्त्या
वल्ली-सनाथ मम देहि करावलम्बम् ॥ ८॥

सुब्रह्मण्याष्टकं पुण्यं ये पठन्ति द्विजोत्तमाः ।
ते सर्वे मुक्तिमायान्ति सुब्रह्मण्य-प्रसादतः ॥

सुब्रह्मण्याष्टकमिदं प्रातरुत्थाय यः पठेत् ।
कोटि-जन्म-कृतं पापं तत्क्षणादेव नश्यति ॥

॥ इति श्रीसुब्रह्मण्याष्टकं अथवा श्रीसुब्रह्मण्य करावलम्बस्तोत्रं सम्पूर्णम् ॥

## आदित्य-कवचम्

उदयाचलमागत्य वेद-रूपम्-अनामयम् ।
तुष्टाव परया भक्त्या वालखिल्यादिभिर्वृतम् ॥१॥
देवासुरैस्सदा वन्द्यं ग्रहैश्च परिवेष्टितम् ।
ध्यायन् स्तुवन् पठन् नाम पर-सूर्य-कवचं सदा ॥२॥
घृणिः पातु शिरोदेशं सूर्यः फालं च पातु मे।

आदित्यो लोचने पातु श्रुती पातु प्रभाकरः ॥३॥
प्राणं पातु सदा भानुः अर्कः पातु मुखं तथा ।
जिह्वां पातु जगन्नाथः कण्ठं पातु विभावसुः ॥४॥
स्कन्धौ ग्रह-पतिः पातु भुजौ पातु प्रभाकरः ।
अहस्करः पातु हस्तौ हृदयं पातु भानुमान् ॥५॥
मध्यम्च पातु सप्ताश्वो नाभिं पातु नभोमणिः।
द्वादशात्मा कटिम् पातु सविता पातु सृक्किणी ॥६॥
ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः।
जहे पातु च मार्ताण्डो गलं पातु त्विषाम्-पतिः ॥७॥
पादौ ब्रध्नस्सदा पातु मित्रोऽपि सकलं वपुः।
वेदत्रयात्मक-स्वामिन् नारायण जगत्पते
अयातयामं तं कञ्चिद् वेद-रूपः प्रभाकरः ॥८॥
स्तोत्रेणानेन सन्तुष्टो वालखिल्यादिभिर्वृतः ।
साक्षाद् वेद-मयो देवो रथारूडस्समागतः ॥९॥
तं दृष्ट्वा सहसोत्थाय दण्डवत्-प्रणमन् भुवि ।
कृताञ्जलि-पुटो भूत्वा सूर्यस्याग्रे स्थितस्तदा ॥१०
वेद-मूर्तिर्महाभागो ज्ञान-दृष्टिर्विचार्य च ।
ब्रह्मणा स्थापितं पूर्वं यातयाम-विवर्जितम् ॥ ११ ॥
सत्त्व-प्रधानं शुकाख्यं वेदरूपम्-अनामयम् ।
शब्द-ब्रह्म-मयं वेदं सत्कर्म-ब्रह्म-वाचकम् ॥१२॥
मुनिम् अध्यापयामास प्रथमं सविता स्वयम् ।
तेन प्रथम-दत्तेन वेदेन परमेश्वरः ॥१३॥

याज्ञवल्क्यो मुनि-श्रेष्ठः कृत-कृत्योऽभवत्तदा ।
ऋगादि-सकलान् वेदान् ज्ञातवान् सूर्य-सन्निधौ ॥१४॥
इदं प्रोक्तं महापुण्यं पवित्रं पाप-नाशनम् ।
यः पठेच्चृणुयाद्वापि सर्व-पापैः प्रमुच्यते ।
वेदार्थ-ज्ञान-सम्पन्नस्सूर्य-लोकम्-अवाप्नुयात् ॥१५॥

॥ इति श्री-आदित्यकवचं संपूर्णम् ॥

## श्री-गुरु-पादुका-स्तोत्रम्

अनन्त-संसार-समुद्र-तार-नौकायिताभ्यां गुरु-भक्तिदाभ्याम् ।
वैराग्य-साम्राज्यद-पूजनाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥ १ ॥
कवित्व-वाराशि-निशाकराभ्यां दौर्भाग्यदावाम्बुद-मालिकाभ्याम् ।
दूरीकृतानम्र-विपत्तिताभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥ २ ॥
नता ययोः श्री-पतितां समीयुः कदाचिदप्याशु दरिद्रवर्याः।
मूकाश्च वाचस्पतितां हि ताभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥३ ॥
नालीक-नीकाश-पदाहृताभ्यां नाना-विमोहादि-निवारिकाभ्याम् ।
नमनाभीति-प्रदाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥ ४ ॥
नृपालि-मौलि-व्रज-रत्न-कान्ति-सरिद्-विराजत्-झष-कन्यकाभ्याम् ।
नृपत्वदाभ्यां नत-लोक-पङ्क्तेः नमो नमः श्री-गुरु-पादुकाभ्याम् ॥५॥
पापान्धकारार्क-परम्पराभ्यां ताप-त्रयाहीन्द्र-खगेश्वराभ्याम् ।
जाड्याब्धि-संशोषण-वाडवाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥ ६ ॥
शमादि-षट्-प्रद-वैभवाभ्यां समाधिदान-व्रत-दीक्षिताभ्याम् ।

रमाधवान्घ्रि-स्थिर-भक्तिदाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम् ॥ ७ ॥

स्वार्चापराणाम् अखिलेष्टदाभ्यां स्वाहा-साहायाक्ष-धुरन्धराभ्याम् ।

स्वान्ताच्च-भाव-प्रद-पूजनाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम्॥८॥

कामादि-सर्प-व्रज-गारुडाभ्यां विवेक-वैराग्य-निधि-प्रदाभ्याम् ।

बोध-प्रदाभ्यां द्रुत-मोक्षदाभ्यां नमो नमः श्री-गुरु-पादुकाभ्याम्॥ ९ ॥

करोमि कायेन तवान्घ्रि-सेवां ब्रवीमि वाचा तव पुण्य-नाम ।

ध्यायामि मूर्तिं तव हृत्-सरोजे प्रसीद शीघ्रं यति-राज मह्यं ॥ १० ॥

॥ इति श्रीगुरुपादुकास्तोत्रम् सम्पूर्णम्॥

## काञ्ची-मठेश-करावलम्बम्

कुम्भघोणवास्तव्येन लक्ष्मीकान्तशर्मणा विरचितम्

प्रातस्स्मरामि भवदीय-मुखारविन्दम्
मन्द-स्मितं च जनि-ताप-हरं जनानाम् ।
संपत्-करीं च भवतोऽत्र-कटाक्ष-लक्ष्मीं
काञ्ची-मठेश मम देहि करावलम्बम् ॥१॥

प्रातः स्मरामि कलि-दोष-हराणि यानि
हृद्यानि दिव्य-मधुराणि मनोहराणि ।
वाक्यानि तेऽद्य वदनाम्बुज-निर्गतानि
काञ्ची-मठे·श मम देहि करा·वलम्बम् ॥ २ ॥

वक्षः-स्थलं विमल-हेम-समान-वर्णं
भस्माङ्कितं जन-मनोहर-कुङ्कुमाक्तम् ।
प्रातस्स्मरामि भवतोऽत्र चिरं महात्मन्
काञ्ची-मठेश मम देहि करावलम्बम् ॥ ३॥

मत्तेभ-तुल्य-गमनं च निरीक्ष्य तेऽद्य
यात्वा वनान्तरम् अनन्त गजाश्चलीनाः।
प्रातस्स्मरामि गज-राज-गतिं तवेदम्
काञ्ची-मठेश मम देहि करावलम्बम् ॥४॥

दक्षेण दण्डम् अवलम्ब्य  सदेतरेण
हस्तेन चारु-कलशञ्च विराजमानम् ।
रक्ताम्बरां च तव चारु-कटिं स्मरामि
काञ्ची-मठेश मम देहि करावलम्बम् ॥५॥

विस्मृत्य दोषमखिलं च ममापराधं
त्रातुं च याऽद्य भगवन् कृत-बद्ध-दीक्षा ।
प्रातः स्मरामि यति-पुङ्गव तेऽनुकम्पां
काञ्ची-मठेश मम देहि करावलम्बम् ॥ ६ ॥

प्रातः स्मरामि भवदीय-पदारविन्दं
यस्मात् प्रयान्ति दुरितानि महान्ति तानि ।
आयान्ति तानि मुहुरद्य सु-मङ्गलानि

काञ्ची-मठेश मम देहि करावलम्बम् ॥ ७ ॥

स्नानाच्च पानाच्च निषेवणाच्च
ध्यानाच्च पापानि लयं प्रयान्ति ।
हे तीर्थ-पादानुसरं पदं ते
तीर्थं च तीर्थी-करणं भजामि ॥ ८ ॥

॥ इति श्रीकाञ्ची-मठेश-करावलम्ब-स्तोत्रम् सम्पूर्णम् ॥

## द्वादश-ज्योतिर्लिङ्ग-स्तोत्रम्

सौराष्ट्र-देशे वसुधावकाशे ज्योतिर्-मयं चन्द्र-कलावतंसम्।

भक्ति-प्रदानाय कृतावतारं तं सोम-नाथं शरणं प्रपद्ये ॥ १ ॥

श्री-शैल-शृङ्गे विविध-प्रसङ्गे शेषाद्रि-शृङ्गेऽपि सदा वसन्तम्।

तमर्जुनं मल्लिक-पूर्वम्-एनं नमामि संसार्-असमुद्र-सेतुम् ॥ २॥

अवन्तिकायां विहितावतारं मुक्ति-प्रदानाय च सज्जनानाम्।

अकाल-मृत्योः परिरक्षणार्थं वन्दे महा-काल-महा-सुरेशम् ॥ ३॥

कावेरिका-नर्मदयोः पवित्रे समागमे सज्जन-तारणाय।

सदैव-मान्धातृ-पुरे वसन्तम् ओङ्कारमीशं शिवम् एकम् ईडे॥ ४॥

पूर्वोत्तरे पारलिकाभिधाने सदा शिवं तं गिरिजा-समेतम्।

सुरासुराराधित-पाद-पद्मं श्री-वैद्यनाथं सततं स्मरामि ॥ ५ ॥

आमर्द-संज्ञे नगरे च रम्ये विभूषिताङ्गं विविधैश्च भोगैः।

सद्भुक्ति-मुक्ति-प्रदमीशम् एकं श्रीनागनाथं शरणं प्रपद्ये ॥ ६॥

सानन्दम्-आनन्दवने वसन्तम् आनन्द-कन्दं हत-पाप-वृन्दम्।

वाराणसी-नाथम्-अनाथ-नाथं श्री-विश्वनाथं शरणं प्रपद्ये ॥ ७॥

यो डाकिनी-शाकिनिका-समाजे निषेव्यमाणं पिशिताशनैश्च ।

सदैव भीमादि-पद-प्रसिद्धं तं शङ्करं भक्तहितं नमामि ॥ ८ ॥

श्री ताम्रपर्णी-जल-राशि-योगे निबद्ध्य सेतुं निशि बिल्व-पत्रैः।

श्रीरामचन्द्रेण समर्चितं तं रामेश्वराख्यं सततं नमामि ॥ ९ ॥

सिंहाद्रि-पार्श्वेऽपि तटे रमन्तं गोदावरी-तीर-पवित्र-देशे ।

यद्दर्शनात् पातक जात नाशः प्रजायते त्र्यम्बकम् ईशम् ईडे ॥१०॥

हिमाद्रि-पार्श्वेऽपि तटे रमन्तं सम्पूज्यमानं सततं मुनीन्द्रैः ।

सुरासुरैर्-यक्ष-महोरगाद्यैः केदार-संज्ञं शिवम् ईशम् ईडे ॥११॥

इलापुरी रम्य-शिवालयेऽस्मिन् समुल्लसन्तं त्रिजगद्-वरेण्यम्।

वन्दे महोदारतर-स्वभावं सदाशिवं तं धिषणेश्वराख्यम् ॥१२॥

एतानि लिङ्गानि सदैव मर्त्याः प्रातः पठन्तोऽमलमानसाश्च।

ते पुत्र-पौत्रैश्च धनैर्-उदारैः सत्कीर्ति-भाजः सुखिनो भवन्ति॥१३॥

॥इति श्रीमद्-शङ्कराचार्य-विरचितं द्वादश-ज्योतिर्लिङ्ग-स्तोत्रं सम्पूर्णम्॥

## कामाक्षी-स्तोत्रम्

कामाक्षि मातर् नमस्ते – काम-दानैक-दक्षे स्थिते भक्तपक्षे ॥
कामारि-कान्ते कुमारि – काल-कालस्य भर्तुः करे दत्त-हस्ते ।
कामाय काम-प्रदात्रि – कामकोटिस्थ पूज्ये गिरं देहि मह्यम् ॥ १॥
श्री-चक्र-मध्ये वसन्तीं – भूत-रक्षः पिशाचाति-दुष्टान् हरन्तीम् ।
श्री-कामकोट्यां ज्वलन्तीं – काम-हीनैस्सुगम्यां भजे देहि वाचम् ॥ २॥
इन्द्रादि-मान्ये सुधन्ये – ब्रह्म-विष्णवादि-वन्द्ये गिरीन्द्रस्य कन्ये ।
मान्यां न मन्ये त्वदन्यां – मानिताङ्घ्रिं मुनीन्द्रैर्भजे मातरं त्वाम् ॥ ३॥
सिंहाधिरूढे नमस्ते – साधु-हृत्-पद्म-गूढे हताशेष-मूढे ।
रूढं हर त्वं गदं मे कण्ठ-शब्दं दृढं देहि वाग्-वादिनि त्वम् ॥ ४॥
कल्याण-दात्रीं जनित्रीं – कञ्ज-पत्राभ-नेत्रां कलानाथ-वक्त्राम् ।
श्री-स्कन्द-पुत्रां सुवस्त्रां – सच्चरित्रां शिवे त्वां भजे देहि वाचम् ॥ ५॥
भक्त्या-कृतं स्तोत्र-रत्नं – दीक्षितानन्तरामेण देवी-प्रसादात् ।
नित्यं पठेत् भक्ति-पूतं – सद्य सर्वार्थ-सिद्धिं भवेद्-एव नूनम् ॥

॥ इति श्री-कामाक्षी-स्तोत्रम् सम्पूर्णम् ॥

# लक्ष्मी-नृसिंह-पञ्च-रत्नम्

त्वत्-प्रभु-जीव प्रियम् इच्चसि चेन् नर-हरि-पूजां कुरु सततं
प्रति-बिम्बालङ्कृति-धृति-कुशलो बिम्बालङ्कृतिम् आतनुते।
चेतोभृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरन्दम्॥ १॥

शुक्तौ रजत-प्रतिभा जाता कटकाद्यर्थ-समर्था चेद्
दुःखमयी ते संसृतिरेषा निर्वृति-दाने निपुणा स्यात्।
चेतोभृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरन्दम् ॥ २॥

आकृति-साम्याच्-चाल्मलि-कुसुमे स्थल-नलिनत्व-भ्रममकरोः
गन्ध-रसाविह किमु विद्येते विफलं भ्राम्यसि भृश-विरसेस्मिन् ।
चेतोभृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरन्दम् ॥३॥

स्रक्-चन्दन-वनितादीन् विषयान् सुखदान् मत्वा तत्र विहरसे
गन्ध-फली-सदृशा ननु तेऽमी भोगानन्तर-दुःख-कृतः स्युः ।
चेतोभृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरन्दम् ॥ ४ ॥

तव हितम् एकं वचनं वक्ष्ये शृणु सुख-कामो यदि सततं

स्वप्ने दृष्टं सकलं हि मृषा जाग्रति च स्मर तद्वदिति
चेतो-भृङ्ग भ्रमसि वृथा भव-मरु-भूमौ विरसायां
भज भज लक्ष्मी-नरसिंहानघ-पद-सरसिज-मकरन्दम् ॥ ५ ॥

॥इति श्रीमद्-गोविन्दभगवत्पाद-शिष्य-श्रीमच्चङ्कर-भगवत्पाद-
विरचितं श्री-लक्ष्मी-नृसिंह-पञ्चरत्न-स्तोत्रं सम्पूर्णम्॥

## श्री-राम-भुजङ्ग-प्रयात-स्तोत्रम्

विशुद्धं परं सच्चिद्-आनन्द-रूपं
गुणाधारम् आधार-हीनं वरेण्यम् ।
महान्तं विभान्तं गुहान्तं गुणान्तं
सुखान्तं स्वयं धाम रामं प्रपद्ये॥ १॥

यदा वर्णयत्-कर्ण-मूलेऽन्त-काले
शिवो राम रामेति रामेति काश्याम्।
तदेकं परं तारक-ब्रह्म-रूपं
भजेऽहं भजेऽहं भजेऽहं भजेऽहम् ॥ ३ ॥

पुरः प्राञ्जलीन् आञ्जनेयादि-भक्तान्
स्व-चिन्मुद्रया भद्रया बोधयन्तम्।
भजेऽहं भजेऽहं सदा रामचन्द्रं
त्वदन्यं न मन्ये न मन्ये न मन्ये॥ ७॥

यदा मत्समीपं कृतान्तः समेत्य
प्रचण्ड-प्रकोपैर् भटैर् भीषयेन्माम्।
तदाविष्करोषि त्वदीयं स्वरूपं
सदापत्-प्रणाशं सकोदण्ड-बाणम्॥ ८॥

सदा राम रामेति रामामृतं ते
सदा-रामम्-आनन्द-निष्यन्द-कन्दम् ।
पिबन्तं नमन्तं सुदन्तं हसन्तं
हनूमन्तम् अन्तर्भजे तं नितान्तम्॥ २१॥

असीता-समेतैर् अकोदण्ड-भूषैः
असौमित्रि-वन्द्यैर् अचण्ड-प्रतापैः ।
अलङ्केश-कालैर् असुग्रीव-मित्रैः
अरामाभिधेयैर् अलम् दैवतैर् नः॥ २३॥

अवीरासनस्थैर् अचिन्मुद्रिकाढ्यैः
अभक्ताञ्जनेयादि-तत्त्व-प्रकाशैः।
अमन्दार-मूलैर् अमन्दार-मालैः
अरामाभिधेयैरलम् दैवतैर् नः॥ २४ ॥

असिन्धु-प्रकोपैर् अवन्द्यप्रतापैः
अबन्धु-प्रयाणैर् अमन्द-स्मिताढ्यैः।

अदण्ड-प्रवासैर् अखण्ड-प्रबोधैः
अरामभिधेयैरलम् दैवतैर्नः॥ २५॥

नमस्ते सुमित्रा-सुपुत्राभि-वन्द्य
नमस्ते सदा कैकयी-नन्दनेड्य।
नमस्ते सदा वानराधीश-वन्द्य
नमस्ते नमस्ते सदा रामचन्द्र ॥ २७॥

प्रसीद प्रसीद प्रचण्ड-प्रताप
प्रसीद प्रसीद प्रचण्डारि-काल।
प्रसीद प्रसीद प्रपन्नानुकम्पिन्
प्रसीद प्रसीद प्रभो रामचन्द्र ॥ २८॥

॥ इति श्रीशङ्कराचार्यविरचितम् श्रीराम-भुजङ्ग-प्रयात-स्तोत्रम् सम्पूर्णम्॥

## विष्णु-षट्-पदी-स्तोत्रम्

अविनयम्-अपनय विष्णो दमय मनः शमय विषय-मृग-तृष्णाम्।
भूत-दयां विस्तारय तारय संसार-सागरतः॥ १॥
दिव्य-धुनी-मकरन्दे परिमल-परिभोग-सच्चिदानन्दे ।
श्रीपति-पदारविन्दे भव-भय-खेद-च्चिदे वन्दे॥ २॥
सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः॥ ३॥

उद्धृत-नग नगभिद्-अनुज दनुज-कुलामित्र मित्र-शशि-दृष्टे ।
दृष्टे भवति प्रभवति न भवति किं भव-तिरस्कारः ॥ ४॥

मत्स्यादिभिर्-अवतारैर्-अवतारवताऽवता सदा वसुधाम्।
परमेश्वर परिपाल्यो भवता भव-ताप-भीतोऽहम्॥ ५॥

दामोदर गुण-मन्दिर सुन्दर-वदनारविन्द गोविन्द ।
भव-जलधि-मथन-मन्दर परमं दरमपनय त्वं मे॥ ६॥

नारायण करुणा-मय शरणं करवाणि तावकौ चरणौ ।
इति षट्पदी मदीये वदन-सरोजे सदा वसतु॥ ७॥ ॥

॥ इति श्रीमच्चंकराचार्यकृतं विष्णुषट्पदीस्तोत्रं सम्पूर्णम्॥

## मुकुन्दमाला (चितानि पद्यानि)

हे गोपालक हे कृपा-जल-निधे हे सिन्धु-कन्या-पते
हे कंसान्तक हे गजेन्द्र-करुणा-पारीण हे माधव।
हे रामानुज हे जगत्-त्रय-गुरो हे पुण्डरीकाक्ष मां
हे गोपी-जन-नाथ पालय परं जानामि न त्वां विना ॥

भक्तापाय-भुजङ्ग-गारुड-मणिस्त्रैलोक्य-रक्षा-मणिः
गोपी-लोचन-चातकाम्बुद-मणिः सौन्दर्य-मुद्रा-मणिः ।
यः कान्ता-मणि-रुक्मिणी-घन-कुच-द्वन्द्वैक-भूषा-मणिः
श्रेयो देव-शिखा-मणिर्-दिशतु नो गोपाल-चूडामणिः॥

शत्रु-च्चेदैक-मन्त्रं सकलम् उपनिषद्-वाक्य-सम्पूज्य-मन्त्रं
संसारोत्तार-मन्त्रं समुचित-तमः-सङ्घ-निर्याण-मन्त्रम् ।
सर्वैश्वर्यैक-मन्त्रं व्यसन-भुजग-सन्दष्ट-सन्त्राण-मन्त्रं
जिह्वे श्री-कृष्ण-मन्त्रं जप तप सततं जन्म-साफल्य-मन्त्रम्॥

## हनुमत्-स्तोत्रम्

बुद्धिर्बलम् यशोधैर्यम् निर्भयत्वम् अरोगता ।
अजाड्यम् वाक्पटुत्वम् च हनूमत् स्मरणात् भवेत् ॥

## मङ्गलम्

शङ्कराय शङ्कराय शङ्कराय मङ्गलम् ।
सकल-दर्म-रक्षकाय मोक्षदाय मङ्गलम् ॥
शङ्कराय श्री-जयेन्द्र-गुरुवराय मङ्गलम् ।
श्रीशङ्कर-विजयेन्द्राचार्याय मङ्गलम् ॥
सुमुखाय मङ्गलं षण्मुखाय मङ्गलम् ।
सहस्र-दल-पद्म-पीठ-वासिन्यै मङ्गलम् ॥
कामकोटि-गुरुवर-चन्द्र-शेखराय मङ्गलम् ।
कामित-प्रद-गोविन्दाय अच्युताय मङ्गलम् ॥

कामाक्षि-पति-शिवाय नटेशाय मङ्गलम् ।

कारुण्य-पूर्ण-वीर-मारुतये मङ्गलम् ॥